# Saparshadashriramakrishnapranamah

# સપાર્ષદશ્રીરામકૃષ્ણપ્રણામઃ

## Document Information

Text title : Saparshadashriramakrishnapranamah

File name : sapArShadarAmakRRiShNapraNAmaH.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Author : Swami Balaramananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# સપાર્ષદશ્રીરામકૃષ્ણપ્રણામઃ

નારાયણં પરં નિત્યમજોઽપિ ચાવ્યયોઽપિ સન્ ।
આવિર્ભૂતં જગત્ ત્રાતું રામકૃષ્ણં નમામ્યહમ્ ॥ ૧॥

અજાઽપિ યા ન છિન્નાપિ ભિન્નરૂપેણ રૂપિતામ્ ।
જનનીં સર્વભૂતાનાં શારદાં પ્રણમામ્યહમ્ ॥ ૨॥

લીલાસહચરં શ્રેષ્ઠં ધર્મચક્રપ્રવર્તકમ્ ।
વન્દે તં સઙ્ઘનેતારં વિવેકાનન્દ-સ્વામિનમ્ ॥ ૩॥

સઙ્ઘસ્ય પ્રથમાધ્યક્ષં ગોપાલં બ્રજવાસિનમ્ ।
રાખાલં માનસં પુત્રં બ્રહ્માનન્દં નમામ્યહમ્ ॥ ૪॥

રામકૃષ્ણપદં શાન્તં શિવમદ્વૈતમવ્યમ્ ।
દદર્શ સતતં યં તં શિવાનન્દં નમામ્યહમ્ ॥ ૫॥

નમામિ શારદાનન્દં “લીલાપ્રસઙ્ગ” —લેખકમ્ ।
તત્ત્વતઃ વર્ણિતઃ યસ્મિન્ રામકૃષ્ણસ્ય જીવનમ્ ॥ ૬॥

રામકૃષ્ણગતપ્રાણં રામકૃષ્ણસ્ય પૂજકમ્ ।
લીલાપ્રવર્ધકં રામકૃષ્ણાનન્દં નમામ્યહમ્ ॥ ૭॥

લીલાસહચરં શુદ્ધં શારદાપદસેવકમ્ ।
નિત્યમુક્તં સદાશાન્તં યોગાનન્દં નમામ્યહમ્ ॥ ૮॥

માતૃવત્સર્વભૂતેષુ પ્રેમવાત્સલ્યવિગ્રહમ્ ।
અહેતુકં પ્રશાન્તં ચ પ્રેમાનન્દં નમામ્યહમ્ ॥ ૯॥

નિરઞ્જનં સદા મુક્તં પવિત્રં માતૃસેવકમ્ ।
વન્દે નિરઞ્જનાનન્દં રામકૃષ્ણપદાશ્રિતમ્ ॥ ૧૦॥

અનાથેષુ તથાર્ત્તેષુ સર્વદા શિવપૂજકમ્ ।
નમામિ નિર્મલં સુજ્ઞમખણ્ડાનન્દ-સ્વામિનમ્ ॥ ૧૧॥

ઉદ્બોધનાદિરૂપેણ કૃત્વા જીવપ્રબોધનમ્ ।
વન્દે તં ત્રિગુણાતીતં યેન પ્રાણાર્પણં કૃતમ્ ॥ ૧૨॥

વેદાન્તશાસ્ત્રમર્મજ્ઞં યોગિનં ચ મનીષિણમ્ ।
રામકૃષ્ણાનતં વન્દે તુરીયાનન્દ-સ્વામિનમ્ ॥ ૧૩॥

વ્યાખ્યાનકુશલં વન્દે સર્વવેદાન્તબોધકમ્ ।
કાલીતપસ્વિનં પૂજ્યમભેદાનન્દસ્વામિનમ્ ॥ ૧૪॥

ભક્તઃ સુકર્મયોગી ચ બાલભાવસમાયુતમ્ ।
તં ભક્તવત્સલં વન્દે સુબોધાનન્દ-સ્વામિનમ્ ॥ ૧૫॥

અજ્ઞં નિરક્ષરં ચાપિ હ્યક્ષરં યેન દર્શિતમ્ ।
વન્દે તમદ્ભુતાનન્દં સરલં શુદ્ધમાનસમ્ ॥ ૧૬॥

નમામિ વૃદ્ધગોપાલં શારદાપ્રિયસેવકમ્ ।
અદ્વૈતાનન્દરૂપેણ ભક્તવૃન્દૈઃ સુપૂજિતમ્ ॥ ૧૭॥

નિર્મિતં સુન્દરં યેન રામકૃષ્ણસ્ય મન્દિરમ્ ।
કર્મવીરમહં વન્દે વિજ્ઞાનાનન્દ-સ્વામિનમ્ ॥ ૧૮॥

રામકૃષ્ણાંશકાન્ સર્વાન્ ભિન્નરૂપૈશ્ચ રૂપિતાન્ ।
લીલાસહચરાન્ વન્દે નાના ભાવ-પ્રદર્શકાન્ ॥ ૧૯॥

લીલાસહચરાન્ સર્વાન્ યુગધર્મસ્ય સ્થાપકાન્ ।
શારદા-રામકૃષ્ણૌ ચ ભૂયો ભૂયો નમામ્યહમ્ ॥ ૨૦॥

ઇતિ સ્વામિબલરામાનન્દવિરચિતઃ “સપાર્ષદશ્રીરામકૃષ્ણપ્રણામઃ” સમાપ્તઃ ।

Proofread by Aruna Narayanan

*Saparshadashriramakrishnapranamah*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*